दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लषष्ठी
आषाढः 06 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-238 | 1 | जून 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 द्वितीय-तृतीय-श्रेणी-नगरेष्वपि एसटीपीआई-जालानां विस्तारस्य योजनास्ति - अश्विनीवैष्णवः

3 सुपरस्पेशियलिटी-चिकित्सकेभ्यः प्राप्स्यते अचिकित्सा-वृत्तिः (नॉन-प्रैक्टिसिंग अलाउंस') मुख्यमन्त्री सुक्खूः

4 विश्वपत्रकारिता(प्रेस) स्वतन्त्रतासूचकाङ्कसमीक्षा (दिवसविशेषः)

## प्रधानमन्त्रिणा नरेन्द्रमोदिना युवसम्मेलनं सम्बोधितम्, १५ लक्षलाभार्थिनां वित्तकोषसंख्यासु २४०० कोटिरूप्यकाणां प्रोत्साहनराशिः प्रेषिता




हिमसंस्कृतवार्ताः — प्रधानमन्त्रिणा नरेन्द्रमोदीमहोदयेन शुक्रवासरे नवदेहल्याः विज्ञानभवने युव-सम्मेलनं सम्बोधितम्। यत्र विकसितभारत-रोजगार-योजनायाः अन्तर्गतं १५ लक्षलाभार्थिनां वित्तकोषसंख्यासु २ सहस्र ४०० (२४००) कोटिरूप्यकाणां प्रोत्साहनराशिः विमुक्ता। अस्मिन् अन्तरे, पी.एम. मोदीमहोदयेन युवभिः सह प्रत्यक्षसंवादः अपि कृतः।

### विश्वं करोति भारतस्य युवाशक्तेः चर्चां

प्रधानमंत्री मोदीमहोदयः अवदत्, 'अद्य अत्र अस्मात् कार्यक्रमात् सम्बद्धेषु युवासहभागिषु महान् भारतस्य उज्ज्वलभवितव्यस्य चित्रं दृश्यमानम् अस्ति। अहम् अधुना एव कतिपयघण्टाभ्यः पूर्वं फ्रान्स-स्लोवाकियादेशयोः यात्रातः प्रत्यागतोऽस्मि। जी-७ (G-7) सम्मेलने विकसितदेशानां दिग्गजनेतृभिः सह अमिलम्। विश्वम् अद्य भारतस्य युवाशक्तेः चर्चां करोति। भारतस्य प्रतिभायाः (टैलेंट), कौशलस्य (स्किल), क्षमतायाः (पोटेंशियल) च चर्चा सुदूरेषु भवन्ती अस्ति। विश्वं भारतस्य यूनां क्षमतां सम्यक् परिचिनोति। तादृशे समये अस्माकं प्रयासः अस्ति यत् भारतस्य प्रत्येकं युवा स्वक्षमताम् अवसरे परिवर्तयितुं शक्नुयात्, अनयैव धिया पी.एम. विकसितभारत-रोजगार-योजनायाः आरम्भः अभवत्।'

प्रधानमंत्री नरेन्द्रमोदी अकथयत् यत् "प्रधानमंत्री विकसितभारत-रोजगार-योजना, इयं रोजगारयोजनायाः बहु अग्रे गत्वा प्रथमसेवावृत्तिं प्राप्नुवतां यूनां स्वप्नेभ्यः शक्तिप्रदात्री योजना अस्ति। इयं युवानां उद्योगानां च मध्ये एकं सुदृढं सेतुं निर्मात्री योजना अस्ति।"

### १० लक्षयूनां प्राप्तं प्रोत्साहनम्

प्रधानमन्त्रिणा मोदीमहोदयेन अग्रे कथितं यत् प्रधानमन्त्रि-विकसितभारत-रोजगारमेला-योजनायाः सहयोगेन अधुना यावत् प्रायः ७० लक्षमिताः सेवावृत्तयः (जॉब्स) सृष्टाः। प्रायः ७० लक्षमितेभ्यः प्रथमवारं नियुक्तेभ्यः कर्मचारिभ्यः (फर्स्ट टाइम एम्प्लाइज) सामाजिकसुरक्षायाः कवचं अपि प्राप्तम्। प्रायः २० लक्षयूनां स्वकीयप्रथमसेवायाः ६ मासाः पूरिताः अपि सन्ति। अद्य एतेषाम् एव मध्ये प्रायः १० लक्षयुवासाथिभ्यः स्वप्रथमसेवावृत्तौ ६ मासानां पूर्तौ अस्याः योजनायाः लाभार्थित्वेन प्रोत्साहनराशिः (इंसेंटिव) अपि अवाप्ता।

### जीविकानिर्माणं राष्ट्रियाभियानं विधातुं लक्ष्यम्

प्रधानमंत्री. मोदीमहोदयः अवदत्, '२ सहस्रकोटिरूप्यकेभ्यः (२००० कोटि) अधिका धनराशिः साक्षात् तेषां बैंक-खातेषु प्राप्ता अस्ति। इयं राशिः केवलम् आर्थिकी सहायता नास्ति, एतत् तेषां परिश्रमस्य सम्मानः अस्ति, एतत् तेषां उज्ज्वल भविष्यति देशस्य विश्वासस्य प्रकटीकरणम् अस्ति। एतानि विवरणानि (आंकड़े) अनुभवाश्च ज्ञापयन्ति यत् यदा सर्वकारः, युवा, उद्योगश्च मिलित्वा अग्रे गच्छन्ति, तदा रोजगारनिर्माणस्य गतिः बहुगुणिता भवति। प्रधानमंत्री विकसितभारत-रोजगारमेला-योजना, अस्य एव नवभारतस्य परिचयः अस्ति। एकं तादृशं भारतं, यत्र यूने अवसरः मिलितुं शक्नुयात्, उद्योगाय प्रोत्साहनं प्राप्येत, रोजगारनिर्माणं च एकं राष्ट्रियाभियानं भवेत्।

## संघ-लोक-सेवा-आयोगेन नवदेहल्यां नूतन-कार्यालयस्य उद्घाटनं कृतम्




संघ-लोक-सेवा-आयोगेन नवदेहल्यां प्रशासनिक आवश्यकतानां पूर्त्यर्थं नूतन-कार्यालयस्य उद्घाटनं कृतम्। आयोगाध्यक्षेन डॉ. अजयकुमारेण अन्यैः सदस्यैः सह अस्य सुविधाकेन्द्रस्य लोकार्पणं सम्पन्नम्।

## भारतीय-वायुसेना जूनमासस्य एकविंशतितमे दिनांके अन्तार्राष्ट्रीय-योगदिवसम् आलक्ष्य देशव्यापिनाम् योगसत्राणाम् आयोजनं करिष्यति

भारतीय-वायुसेना जूनमासस्य एकविंशतितमे दिनांके अन्तार्राष्ट्रीय-योगदिवसम् आलक्ष्य देशव्यापिनाम् योगसत्राणाम् आयोजनं करिष्यति। एषु कार्यक्रमेषु वायुसैनिकाः, एनसीसी-प्रशिक्षार्थिनः तथा विद्यालयीय-विद्यार्थिनः अपि सहभागित्वं करिष्यन्ति।

## भारतीय-ऋतु -विभागः

ऋतु - विभागेन देशस्य विभिन्नेषु भागेषु अतिवृष्टेः पूर्वानुमानं प्रकटितम्। भारतीय-ऋतु - विभागेन बिहार - तमिलनाडु-पश्चिमबङ्गालराज्यानि तथा पूर्वोत्तर राज्येषु श्वः पर्यन्तं अतिवृष्टेः पूर्वानुमानं कृतम्। हिमाचलप्रदेश-जम्मू-कश्मीर-लद्दाखादिषु प्रदेशेषु हिमवृष्ट्या सह मेघगर्जनस्य सम्भावना अपि प्रकटिता ।

## झारखण्डे वज्रपात-घटनासु अष्ट जनाः मृताः

झारखण्डराज्ये गत-चतुर्विंशति-होरासु पृथक् पृथक् स्थानेषु वज्रपात-घटनायाम् अष्ट जनानां मृत्युर्जाता। अनेके जनाः आहताः अपि अभवन्। हजारीबाग जनपदे त्रयः जनाः मृताः, रामगढ, आदि जनपदेषु च एकैकस्य जनस्य मृत्युः अभवत् ।

## फीफा विश्वचषक प्रतियोगितायां मेक्सिको-दलेन दक्षिण कोरिया-दलम् एक-शून्य अंकान्तरालेन पराजितम्

फीफा विश्वचषक-प्रतियोगितायां मेक्सिको-दलेन दक्षिणकोरिया-दलम् एक-शून्य-अंकान्तरालेन पराजितम् । अनेन विजयेन मेक्सिको-दलं प्रतियोगिरूपेण द्वात्रिंशत्र्त् चरणे प्रविशत्सु दलेषु प्रथमं राष्ट्रं जातम्।

## सुभाषितम्

**माता मित्रं पिता चेति,**
**स्वभावात्रितयं हितम्।**
**कार्यकारणतश्चान्ये,**
**भवन्ति हितबुद्धयः॥**
**(हितोपदेश, मित्रलाभ- ३८)**

अर्थात्- 'माता, पिता और मित्र ये तीनों स्वभाव से हितकारी होते हैं, और अन्य लोग कार्य और किसी कारण से हित की इच्छा करने वाले होते हैं।




## दिल्ली उच्चन्यायालयेन नीट-पुनर्परीक्षायाः प्राक् टेलिग्राम-सामाजिक-संपुटकस्य अस्थायि-रूपेण निषेधः वैधानिकः उक्तम्




नीट-पुनर्परीक्षायाः प्राक् सामाजिक-संपुटकस्य टेलिग्राम इत्यस्य अस्थायिरूपेण निषेधः वैधानिकः उक्तं दिल्ली उच्च न्यायालयेन । दिल्ली-उच्चन्यायालयेन नीट-यूजी पुनर्परीक्षायाः पूर्व टेलिग्राम-संपुटकस्य अस्थायि-निषेधसम्बद्धः केन्द्रप्रशासनस्य निर्णयः अनुमोदितः। न्यायाधीशः तेजस-करिया उक्तवान् यत् एषः निर्णयः सूचना प्रौद्योगिकी अधिनियमस्य धारा-एकोनसप्तत्यधिक-षष्ट्याः प्रक्रियानुसारं कृतः।

# सप्तचत्वारिंशदुत्तर द्विसहस्र-वर्षात् पूर्वमेव सिकल सेल-रोगस्य उन्मूलनं भविष्यति - राष्ट्रपति द्रौपदी मुर्मुः




विश्व-सिकल सेल-दिवसस्य अवसरे मध्यप्रदेशस्य ओंकारेश्वरे आयोजिते राज्यस्तरीये कार्यक्रमे राष्ट्रपतिः द्रौपदी मुर्मु विश्वासं प्रकटितवती यत् भारतं सप्तचत्वारिंशदुत्तर द्विसहस्र-वर्षस्य राष्ट्रियलक्ष्यात् पूर्वमेव सिकल सेल-रोगात् उन्मूलनं करिष्यति। सा विशेषतः जनजातीय समुदायेषु अस्य आनुवंशिक-रक्तविकारस्य विषये जागरुकतावर्धनाय समन्वित प्रयत्नानाम् आह्वानम् अकरोत्। अस्मिन् अवसरे मध्यप्रदेशस्य राज्यपालः मंगुभाई पटेलः तथा मुख्यमन्त्री मोहन यादवः अपि उपस्थिताः आसन् । राष्ट्रपतिः राज्य-सर्वकाराणां अधिकारिणः च अस्य रोगस्य उन्मूलनार्थं गम्भीरप्रयत्नान् कर्तुम् आग्रहं कृतवती। तया राष्ट्रिय-सिकल सेल-अनीमिया-उन्मूलन-मिशन इत्यासां उपलब्धीनां प्रशंसा कृता। तथा त्रयोविंशत्युत्तर द्विसहस्रतमे वर्षे निर्धारितं व्यापक-परीक्षण-लक्ष्यं समयात् पूर्वमेव सिद्धम् इत्यत्र तया सन्तोषः व्यक्तः । राष्ट्रपतिः ह्य सायंकाले स्वगृहराज्यं ओडिशां प्रति द्विदिवसीय-भ्रमणाय प्रस्थितवती ।

# भारतेन संयुक्तराष्ट्रसङ्घस्य मानव अधिकार-परिषदि पाकिस्तानस्य कट्वालोचना कृता तथा च "प्राचीनम्" सिन्धु-जल-सन्धिम् वर्तमान-वास्तविकतायाः कृते अनुपयुक्तम् इत्यपि उक्तम्




भारतेन संयुक्तराष्ट्रसङ्घस्य मानव अधिकार-परिषदि पाकिस्तानस्य कट्वालोचना कृता तथा च सिन्धु-जल-सन्धिम् "प्राचीनम्" वर्तमानकालस्य वास्तविकतायाः कृते अनुपयुक्तम् इत्यपि उक्तम्। मानव अधिकार परिषदः द्विषष्टितमे सत्रे संयुक्तराष्ट्रसङ्घस्य भारतस्य स्थायि अभियानस्य प्रथमसचिवः अनुपमा सिङ्घः इत्येषा उक्तवती यत्, नीत्याधारित रूपेण आतङ्कवादस्य निर्यातकः एकः देशः सद्भावनायाः मित्रतायाः च आधारेण सहकारस्य विशेषाधिकारान् निरन्तरं याचते। संयुक्तराष्ट्रसङ्घ पाकिस्तानेन इस्लामिक् सहकार-सङ्घटनेन (ओ. आई. सी.) इत्यनेन च जम्मू-कश्मीरस्य चर्चायै इस्लामाबादस्य अपि अनुपमा सिङ्घ वर्या आलोचनां कृतवती, जम्मू-कश्मीरम् "भारतस्य अभिन्नः अविभाज्यः च भागः आसीत्, अस्ति, भविष्यति च" इति दृढतया प्रोक्तवती ।

# द्वितीय-तृतीय-श्रेणी-नगरेष्वपि एसटीपीआई-जालानां विस्तारस्य योजनास्ति - अश्विनीवैष्णवः



द्वितीय-तृतीय-श्रेणी-नगरेष्वपि एसटीपीआई-जालानां विस्तारस्य योजनास्ति इति अश्विनीवैष्णवेन उक्तम् । केन्द्रीय विद्युत-सूचना प्रौद्योगिकी-मन्त्री अश्विनीवैष्णवः उक्तवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सॉफ्टवेयर-टेक्नोलॉजी पार्क्स-ऑफ् इण्डिया इत्यस्य जालस्य विस्तारः देशस्य द्वितीय-तृतीय-श्रेण्याः नगरेष्वपि कृतः। पटना-स्थितस्य एसटीपीआई-केन्द्रस्य भ्रमणावसरे तेन बिहारस्य सूचना प्रौद्योगिकी-प्रविधि परितन्त्रस्य विकासविषये केन्द्र-राज्य-प्रशासनयोः सहयोगस्य चर्चा कृता। तेन बिहारराज्ये आईटी सूचनाप्रविधेः क्षेत्रस्य संवर्धने मुख्यमन्त्रिणः सम्राटचौधरी महोदयस्य प्रयत्नाः अपि प्रशंसिताः।

# सर्वोच्चन्यायालयस्य पादचारिणां अधिकारविषयकः निर्णयः

सर्वोच्चन्यायालयः ऐतिहासिकं निर्णयं दत्तवान् यत् निश्चितपादपथे (Footpath) चलनम् एकः मौलिकः अधिकारः अस्ति। न्यायालयेन स्पष्टं कृतं यत् नागरिकस्य पादपथे चलनस्य अधिकारः प्राथमिकः अस्ति तथा च मोटरयानानां गमनागमनात् अस्य अधिकारस्य महत्त्वम् अधिकं वर्तते।न्यायालयस्य महत्वपूर्णे निर्णयानुसारम्, अयम् अधिकारः संविधानस्य अनुच्छेद-२१ (जीवनस्य स्वातन्त्र्यस्य च अधिकारः) तथा अनुच्छेद-१९ (सञ्चारस्वातंत्र्यम्) इत्यनयोः अन्तर्गतं गारण्टीकृतस्य आवागमनस्य अधिकारस्य अभिन्नः भागः अस्ति।
अयम् आदेशः एकस्य दुःखदस्य मोटर-दुर्घटना-क्षतिपूर्ति-प्रकरणस्य सुनवायीकाले निर्गतः। घटनायां पिता स्वपञ्चवर्षीयपुत्रं विद्यालयं नयन् आसीत्, तदैव दुर्घटनायां बालकस्य मृत्युः अभवत्।सर्वोच्चन्यायालयः पादपथे चलनस्य मौलिकं अधिकारं सुनिश्चितीकर्तुं एकस्य नियामक-निकायस्य (Regulatory Body) गठनस्य सुझावमपि दत्तवान्। न्यायालयेन उक्तं यत् एतादृशः निकायः सरकारी-औद्योगिकनियन्त्रणात् मुक्तः भूत्वा स्वतन्त्रतया निष्पक्षं निर्णयं गृह्णीयात्, येन संस्थागतनिष्ठा अक्षुण्णा स्यात्।

# किशाऊ-जलबन्धात् हिमाचलाय २११ मेगावाट-मिता मुक्ता विद्युत्, ६०० कोटिरूप्यकाणां भविष्यति आयः - मुख्यमन्त्री सुक्खूः



**हिमसंस्कृतवार्ताः — शिमला ।**मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः शुक्रवासरे हिमाचलप्रदेशविश्वविद्यालये शैक्षणिकखण्डस्य सङ्गणकाधारित-परीक्षा-प्रयोगशालायाः (सीबीटी लैब) च उद्घाटनम् अकरोत्। तदनन्तरं पत्रकारैः सह सम्भाषणे मुख्यमन्त्रिणा कथितं यत् किशाऊ-जलबन्ध-परियोजनायां हिमाचलप्रदेशाय कश्चन महत्त्वपूर्णः सन्धिः जातः। अस्मिन् सन्धौ राज्यं २११ मेगावाट-मितां मुक्तां विद्युत् प्राप्स्यति। अनेन सह एव पञ्चवर्षेभ्यः परं प्रतिवर्षं ६०० कोटिरूप्यकाणाम् आयः अपि भविष्यति। मुख्यमन्त्रिणा ज्ञापितं यत् राज्यसर्वकारेण किशाऊ-परियोजनायां स्वकीयां सहमतिं प्रदातुं पूर्वं निराकृतम् आसीत्। अयं जलबन्धः यमुना-टोन्स-नद्योः उपरि निर्माणाधीनः अस्ति। अस्मात् उत्तरभारतस्य राज्येभ्यः यथा राजस्थान-देहल्ली-हरियाणाप्रदेशेभ्यः जलं प्राप्स्यते। मुख्यमन्त्रिणा सुक्खूवर्येण स्पष्टीकृतं यत् यदि हिमाचलाय मुक्ता विद्युत् न दीयेत, तर्हि राज्यं सहमतिं न प्रदास्यति। अधुना हिमाचलप्रदेशः २११ मेगावाट-मितां मुक्तां विद्युत् प्राप्स्यति। एषा एका ऐतिहासिक्यपि उपलब्धिः वर्तते। यदि इयं परियोजना कस्यैचित् निजी-संस्थायै (प्राइवेट कम्पनी) प्रदीयेत स्म, तर्हि केवलं १२ प्रतिशतं मुक्तस्वाम्यभागः (रॉयल्टी) तथा च एकं प्रतिशतं 'लाडा' (LADA) प्राप्तम् अभविष्यत्।

## बीबीएमबी-अवशिष्टधनस्य स्वाम्यभागस्य च याचना

मुख्यमन्त्री भाखड़ा-ब्यास-प्रबन्धन-मण्डलस्य (बीबीएमबी) अवशिष्टधनं (बकाया) अधिकृत्य अपि अवदत्। सः अकथयत् यत् सर्वोच्चन्यायालयः २०११ तमे वर्षे हिमाचलप्रदेशस्य पक्षे निर्णयं दत्तवान् आसीत्। तदनुसारं हरियाणाप्रदेशेन ७.१९ प्रतिशताधारेण अवशिष्टधनं प्रदेयम् आसीत्। हरियाणा-पञ्जाब-राजस्थानानि अस्मिन् निरन्तरं बाधाम् उत्पादयन्ति। मुख्यमन्त्रिणा कथितं यत् वयम् अस्यै न्यायालये सङ्घर्षाय देशस्य प्रसिद्धं अधिवक्तारं कपिलसिब्बलमहोदयम् उपस्थापितवन्तः। सः इमामपि समयं स्थापितवान् यत् हरियाणाप्रदेशः सर्वोच्चन्यायालये शपथपत्रं दद्यात् यत् सः बीबीएमबी इत्यस्य अवशिष्टभागं प्रदास्यति। अनेन हिमाचलस्य जनता लाभान्विता भविष्यति।

## मुख्यमन्त्रिणा 'एच.पी.यू.' संस्था 'ग्रीन हाइड्रोजन' क्षेत्रे अनुसन्धानार्थं समाहूता

एतस्मात् पूर्वं मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः शुक्रवासरे हिमाचलप्रदेशविश्वविद्यालये (एच.पी.यू. शिमला) विविधानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च अकरोत्। सः १०.०९ कोटिरूप्यकाणां व्ययेन निर्मितस्य 'मल्टी फैकल्टी' भवनस्य उद्घाटनम् अकरोत्। अस्मिन् भवने त्रीणि शैक्षणिकतलानि, सङ्गणक-सह-सीबीटी-प्रयोगशाला तथा च वाहन-अवस्थान (पार्किंग) सुविधा उपलप्स्यन्ते। मुख्यमन्त्रिणा नवनिर्मितायाः सीबीटी-प्रयोगशालायाः अपि उद्घाटनं कृतम्। इयं सुविधा शिक्षणक्षमतावर्धनाय अङ्कीय-शिक्षायाः (डिजिटल एजुकेशन) प्रोत्साहनाय च महत्त्वपूर्णां भूमिकां वक्ष्यति। मुख्यमन्त्रिणा ८.२५ कोटिरूप्यकाणां व्ययेन निर्मीयमानस्य नूतन-शैक्षणिक-खण्डस्य (अकादमिक ब्लॉक) शिलान्यासः अपि कृतः। एतद् पञ्चतलीय-भवनं भविष्यति, यस्मिन् वाहन-अवस्थानं, नवीनाः कक्षाः, वर्धमान-छात्रसङ्ख्यानुगुणं अतिरिक्तं शैक्षणिकस्थानं च प्रदास्यते। मुख्यमन्त्री हिमाचलप्रदेशविश्वविद्यालयस्य विविधानां योजनानां परियोजनानां च समीक्षाम् अपि अकरोत्। सः अवदत् यत् राज्यसर्वकारः विश्वविद्यालयं सबलीकर्तुं सर्वं सम्भवं सहयोगं प्रददाति तथा च अस्य विकासाय प्रतिवर्षं १५० कोटिरूप्यकाणां साहाय्यं ददाति। सः अकथयत् यत् एतैः प्रयासैः विश्वविद्यालयस्य आधारभूत-संरचना, अङ्कीय-परिवर्तनं, शैक्षणिक-उत्कृष्टता च सुदृढा भविष्यति। सुक्खूवर्येण कथितं यत् राज्यसर्वकारः स्वच्छ-हरित-ऊर्जायाः सम्बर्धनाय सक्रियतापूर्वकं कार्यं करोति। अस्यामेव दिशि सोलनमण्डलस्य नालागढे प्रदेशस्य प्रथमा 'ग्रीन हाइड्रोजन' परियोजना स्थाप्यमाना अस्ति। सः विश्वविद्यालयं 'ग्रीन हाइड्रोजन' क्षेत्रे शोधकार्यं (अनुसन्धाय) कर्तुम् आग्रहं कुर्वन् अवदत् यत् अस्मिन् क्षेत्रे राज्याय अपाराः सम्भावनाः सन्ति।

# सुपरस्पेशियलिटी-चिकित्सकेभ्यः प्राप्स्यते अचिकित्सा-वृत्तिः (नॉन-प्रैक्टिसिंग अलाउंस') मुख्यमन्त्री सुक्खूः




**हिमसंस्कृतवार्ताः — शिमला।** मुख्यमन्त्री ठाकुर-सुखविन्दर-सिंह-सुक्खूः अकथयत् यत् हिमाचलप्रदेशे स्वास्थ्यसेवाः अधिकं सुदृढाः कर्तुं राज्यसर्वकारः 'सुपर-स्पेशियलिटी' चिकित्सकेभ्यः अचिकित्सा-वृत्तिः ('नॉन-प्रैक्टिसिंग अलाउंस) प्रदास्यति। मुख्यमन्त्री गतसायं स्वास्थ्यविभागस्य समीक्षा-उपवेशनस्य अध्यक्षतां कुर्वन् आसीत्। मुख्यमन्त्रिणा कथितं यत् राज्यसर्वकारः प्रदेशस्य जनेभ्यः गुणवत्तापूर्णाः स्वास्थ्यसेवाः उपलापयितुं कटिबद्धः अस्ति, स्वास्थ्यक्षेत्रस्य विकासाय च धनस्य कोऽपि अभावः नास्ति। सः अवदत् यत् विगतेषु सार्ध-त्रिवर्षेषु स्वास्थ्य-आधारभूतसंरचनानां सेवानां च सुदृढीकरणाय बह्व्यः प्रमुखाः उपक्रमाः कृताः, येषां सकारात्मक-परिणामाः अधुना सम्मुखीभवन्ति। श्रीसुक्खूः अवदत् यत् स्वास्थ्योन्नयनान् अधिकृत्य सर्वकारेण चिकित्सकैः सह विस्तरेण विमर्शः कृतः। आगामिषु मासेषु सः स्वयमेव विभिन्नानां स्वास्थ्यसंस्थानां भ्रमणं करिष्यति चिकित्सकैः च सह संवादं विधाय स्वास्थ्यक्षेत्रस्य सुदृढीकरणस्य आधुनिकीकरणस्य च रूपरेखां सज्जीकरिष्यति।

सः अवदत् यत् राज्यस्य सर्वेषु आयुर्विज्ञान-महाविद्यालयेषु (मेडिकल कॉलेजेषु) पर्याप्त-कर्मचारिणः अत्याधुनिक-उपकरणानि च उपलाप्य ते 'एम्स' (AIIMS) नवदेहली-स्तरस्य विधीयन्ते। राज्यसर्वकारः आधुनिक-चिकित्सा-यन्त्राणां उपकरणानां च क्रयणाय प्रायः ३,००० कोटिरूप्यकाणि व्ययीकरोति। सः अवदत् यत् येषु मण्डलेषु आयुर्विज्ञान-महाविद्यालयाः न सन्ति, तत्रत्यानां क्षेत्रीय-मण्डलीय-चिकित्सालयानां (जोनेल् अस्पताल्) अपि सुविधाः समुन्नताः क्रियन्ते, येन रोगिभ्यः उत्तम-स्वास्थ्यसेवाः प्राप्तुं शक्येरन्। मुख्यमन्त्रिणा कथितं यत् स्वास्थ्यसंस्थानेषु चिकित्सकानां, पैरामेडिकल-कर्मचारिणां, तन्त्रज्ञानां (तकनीशियनों) च न्यूनतां दूरीकर्तुं नियुक्ति-प्रक्रिया (भर्ती) प्रचलन्ती अस्ति। सः ज्ञापितवान् यत् सर्वकारस्य प्रयासैः प्रथमतया प्रदेशे 'रोबोटिक-शल्यचिकित्सायाः' (रोबोटिक सर्जरी) सुविधा आरब्धा। पूर्वं तादृशीम् उन्नतां चिकित्सासुविधां प्राप्तुं जनैः हिमाचलप्रदेशात् बहिः गन्तव्यं भवति स्म, अत्यधिकं व्ययं च वोढव्यं भवति स्म। श्रीसुक्खूः स्वास्थ्यविभागं निर्दिष्टवान् यत् सर्वाणि सामुदायिक-स्वास्थ्य-केन्द्राणि (CHCs) जनसङ्ख्यायाः आधारेण वर्गीक्रियन्ते, येन वास्तविक-आवश्यकतानुसारं कर्मचारिणः आधारभूतसुविधाश्च उपलापयितुं शक्येरन्। अनेन जनाः स्वगृहाणाम् अन्तिके एव गुणवत्तापूर्णाः स्वास्थ्यसेवाः प्राप्स्यन्ति। सः स्वास्थ्यविभागे प्रचलन्तीनां विभिन्नानां नियुक्तिप्रक्रियाणां स्थितेः अपि समीक्षाम् अकरोत्। उपवेशने ग्रामीणविकास-पञ्चायतीराज-मन्त्री अनिरुद्धसिंहः, महाधिवक्ता अनूपरतनः, विशेषसचिवः डॉ. अश्विनीकुमारशर्मा, जितेन्द्रसाञ्जटा, राष्ट्रीय-स्वास्थ्य-मिशन इत्यस्य प्रबन्ध-निदेशकः प्रदीपठाकुरः, हिमाचलप्रदेश-मेडिकल-सर्विसेज-कॉर्पोरेशन इत्यस्य प्रबन्ध-निदेशकः दिव्यांशुसिङ्गलः अन्ये च वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

# हिमाचले २१८३ मार्गेभ्यः वनभूमि-हस्तान्तरणस्य सज्जता, मुख्यमन्त्री सुक्खूः अददत् निर्देशान्



**हिमसंस्कृतवार्ताः — शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः शुक्रवासरे वनविभागस्य उपवेशनस्य अध्यक्षताम् अकरोत्। सः २१८३ मार्गेभ्यः वनभूमि-हस्तान्तरणस्य व्यापकां योजनां सज्जीकर्तुं निर्देशान् अददत्। इयं योजना वन-अधिकार-अधिनियम-२००६ इत्यस्य प्रावधानानां अन्तर्गतं निर्मास्यते।

एते मार्गाः वनसंरक्षण-अधिनियम-१९८० इत्यस्य अनुमतेः विना एव निर्मिताः आसन्। राज्यसर्वकारः ग्रामीण-सम्पर्क-अधोसंरचनां सुदृढीकर्तुं प्रतिश्रुतः अस्ति। अस्य उद्देश्यं दूरवर्ति-क्षेत्रेषु उत्तम-प्राप्तिं सुनिश्चितं कर्तुम् अस्ति। एते मार्गाः दूरस्थेभ्यः वस्तिभ्यः महत्त्वपूर्णं सम्पर्कं प्रददति। विशेषतः राज्यस्य आपदा-सम्भावित-क्षेत्रेषु आपत्कालीन-प्रतिक्रियायै एते अतीव महत्त्वपूर्णाः सन्ति। एते मार्गाः वर्षे २००६ तमे 'एफ.आर.ए.' (FRA) प्रवर्धनात् पूर्वं निर्मिताः आसन्। वर्ष २०१६ तः २०२६ तमवर्षस्य मध्ये केवलं १५० मार्ग-प्रकरणेभ्यः एव स्वीकृतिः प्राप्ता आसीत्। उच्चन्यायालये एका जनहितयाचिका प्रस्तुता आसीत्। न्यायालयः विभागं एफ.आर.ए. इत्यस्य प्रावधानानां अन्तर्गतं प्रक्रियां पूरयितुं निर्देशान् अददत्। उपवेशने ग्रामीणविकास-पञ्चायतीराज-मन्त्री अनिरुद्धसिंहः अपि उपस्थितः आसीत्। मुख्यसचिवः के.के. पन्तः, महाधिवक्ता अनूपरतनः, विशेषसचिवः (वनम्) विजयकुमारः च अपि उपस्थिताः आसन्।

## ग्रामीण-सम्पर्कस्य सुदृढीकरणम्

मुख्यमन्त्रिणा ग्रामीणक्षेत्रेषु मार्गाणां महत्त्वे बलं दत्तम्। एतैः मार्गैः दूरस्थाः वस्तयः यावत् गमनं सुकरं भविष्यति। एतद् राज्यस्य आपदा-सम्भावित-क्षेत्रेभ्यः अपि महत्त्वपूर्णं वर्तते। आपत्कालीन-सेवानां प्राप्तावधौ परिष्कारः भविष्यति। सर्वकारः अस्यां दिशि तीव्रगत्या कार्यं कर्तुम् इच्छति।

एते मार्गाः वन-अधिकार-अधिनियमस्य प्रवर्धनात् पूर्वं निर्मिताः आसन्। वनसंरक्षण-अधिनियमस्य अनुमतेः विना एव एतेषां निर्माणं अभवत्। गतेषु दशसु वर्षेषु अतीव न्यून-प्रकरणेषु एव स्वीकृतिः अवाप्ता। उच्चन्यायालयः अस्मिन् विषये हस्तक्षेपं कृतवान् आसीत्। न्यायालयः विभागं एफ.आर.ए. अन्तर्गतं प्रक्रियां समापयितुम् आदेशं दत्तवान्।

## प्रदेशस्य हितं विक्रीय हितैषी भवितुं प्रपञ्चं करोति मुख्यमन्त्री सुक्खूः - जयरामठाकुरः



**हिमसंस्कृतवार्ताः — शिमला।** प्रतिपक्षनेता जयरामठाकुरः आरोपम् अकरोत् यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः स्वकार्यकाले निरन्तरं प्रदेशस्य हितानि विक्रीतवान्, स्वयं च हिमाचलस्य हितैषी भवितुं प्रपञ्चं रचयति। प्रदेशस्य जनाः तस्य सत्यं जानन्ति, अतः तस्य कस्यापि असत्यभाषणस्य अधुना कोऽपि प्रभावः न भविष्यति। शिमलातः प्रसारिते वक्तव्ये सः अवदत् यत् सत्तायाम् आगमनात् आरभ्य एव मुख्यमन्त्री मन्त्रिमण्डलस्य अपेक्षया मित्रमण्डलाय प्राधान्यं दत्तवान्।

तेन 'हिमाचलप्रदेशः विक्रयार्थम्' (हिमाचल प्रदेश ऑन सेल) इति अभियानं चालितम्, यस्मिन् भाजपादलस्य विरोधात् न्यायालयस्य हस्तक्षेपात् च सफलता न प्राप्ता। अधुना किशाऊ-जलबन्धं (डैम) अधिकृत्य असत्योपरि असत्यं उच्यते। मुख्यमन्त्री केन्द्रसर्वकारस्य कृतज्ञः भवेत् यत् तेन पूर्वमपि हिमाचलप्रदेशस्य हितेभ्यः प्राधान्यं दत्तं, अद्यापि च प्राधान्यं दीयते। मुख्यमन्त्रिणः वचनेषु विश्वासः कठिनः, परन्तु सः यद् अधिकारं करोति, तत् एतस्मात् कारणात् सम्भवम् अभवत् यतो हि अस्माकं सर्वकारस्य समये अपि केन्द्रसर्वकारेण सह सम्भाषणे वयं हिमाचलस्य हितानि सर्वोपरि स्थापितवन्तः आस्म। हिमाचलस्य हितेभ्यः प्राधान्यप्रदानात् एव एतत् सम्भाषणं दीर्घकालं यावत् प्रचलितम्। मुख्यमन्त्रिणा एतद् अवगन्तव्यं यत् सर्वकाराणां परिवर्तनेन प्रदेशस्य हितानि न परिवर्तन्ते, न च पूर्वसर्वकारस्य उपलब्धयः प्रयोगाः च निरस्तं कर्तुं शक्यन्ते।

जयरामठाकुरः प्रश्नम् उत्थापयन् अवदत् यत् प्रदेशस्य हितैषी मुख्यमन्त्री सुक्खूः कथयतु यत् प्रदेशस्य बहूनां नेतॄणां सविधस्थाः (करीबी) देशे सर्वत्र भ्रमित्वा धारा-११८ इत्यस्यां शिथिलतां दापयितुं निविदां (ठेका) गृह्णन्तः आसन्, तेभ्यः कस्य संरक्षणं प्राप्तम् आसीत्? कृषिविश्वविद्यालयस्य ११० हैक्टेयरमितात् अधिका भूमिः कस्य इङ्गितेन कस्मै च विक्रीता आसीत्? प्रदेशे वेगेन प्रचलतः अवैध-खननस्य कस्य संरक्षणं वर्तते? प्रदेशे वनमाफिया कस्य इङ्गितेन ताण्डवं करोति? अवैध-सुरा-कार्यागारेभ्यः (शराब की अवैध फैक्ट्रियों को) मुख्यमन्त्रिकार्यालयतः कस्य संरक्षणं प्राप्तम् अस्ति? चेस्टरहिल-सदृशे १५०० कोटिरूप्यकाणां महाघोटाले आरोपित-उच्चाधिकारिणः कः रक्षति आसीत्, किमर्थं च रक्षति आसीत्? जयरामठाकुरः अवदत् यत् एतादृशाः बहवः प्रश्नाः सन्ति, येषाम् उत्तराणि मुख्यमन्त्रिणः पार्श्वे न सन्ति, यतो हि तस्य नीतौ एव दोषः अस्ति।

प्रतिपक्षनेतारं जयरामठाकुरं शुक्रवासरे सिरमौरमण्डलस्य भाजपा-समर्थिताः विजयिनः जिलापरिषदः जनप्रतिनिधयः राजगढ़-विधायिकया रीनाकश्यपया, शिलाई-भूतपूर्वविधायकेन बलदेवतोमरेण तथा च सिरमौरमण्डलस्य सर्वैः मण्डलाध्यक्षैः सह तस्य आधिकारिक-आवासे शिष्टाचारमेलनं कृतवन्तः।

# विश्वपत्रकारिता(प्रेस)स्वतन्त्रतासूचकाङ्कसमीक्षा (दिवसविशेषः)

**डॉ विमलेश झा,गंगौली,राजे, मधुबनी, बिहार।** वर्तमानयुगे सञ्चारमाध्यमानि लोकतन्त्रस्य चतुर्थस्तम्भरूपेण परिगण्यन्ते। यत्र समाजे स्वतन्त्रपत्रकारिता भवति, तत्र जनानां विचारस्वतन्त्रता, शासनस्य उत्तरदायित्वं तथा लोकहितस्य संरक्षणं च सुदृढं भवति। प्रेसस्वातन्त्र्यं केवलं पत्रकाराणां अधिकारः नास्ति, अपितु नागरिकानां सत्यज्ञानस्य मूलाधारः अस्ति। यदि पत्रकाराः निर्भयतया सत्यं प्रकाशयितुं न शक्नुवन्ति, तर्हि लोकतन्त्रस्य मूलभित्तिः कम्पितुं प्रारभते।

एतस्याः प्रेसस्वतन्त्रतास्थितेः मूल्याङ्कनार्थं “विश्वप्रेसस्वतन्त्रतासूचकाङ्कः” (World Press Freedom Index) नामकः वैश्विकः सूचकाङ्कः प्रतिवर्षं प्रकाशितो भवति। अयं सूचकाङ्कः विविधेषु राष्ट्रेषु पत्रकारितायाः स्वतन्त्रतां, पत्रकाराणां सुरक्षां, शासनस्य हस्तक्षेपं, सामाजिकपरिस्थितिं तथा आर्थिकतामनुसृत्य च परीक्षते।

## विश्वप्रेसस्वतन्त्रतासूचकाङ्कस्य परिचयः

विश्वप्रेसस्वतन्त्रतासूचकाङ्कः “सीमारहिताः पत्रकाराः(Reporters Without Borders) (RSF)” इति पेरिसनगरस्य अन्ताराष्ट्रियसंस्थया 2002 तमवर्षात् आरभ्य प्रतिवर्षं प्रकाशितः भवति। अस्य मुख्योद्देश्यं विश्वे पत्रकारितायाः वास्तविकस्थितेः आकलनं कर्तुम् अस्ति। अयं सूचकाङ्कः 180 राष्ट्राणां मूल्याङ्कनं करोति। अस्य मूल्याङ्कनस्य पञ्च प्रमुखाःधाराःसन्ति- राजनीतिकपरिस्थितिः ,विधिसंरचना,आर्थिकपरिस्थितिः, सामाजिक-सांस्कृतिकपरिस्थितिः,पत्रकाराणां सुरक्षा च ।

एतेषां सर्वेषां आधाराणां समन्वयेन राष्ट्रस्य प्रेसस्वतन्त्रतास्थितिः निर्धारिता भवति। प्रेसस्वतन्त्रता लोकतन्त्रस्य आत्मा अस्ति। पत्रकाराः यदि निर्भयतया शासनस्य दोषान् उद्घाटयन्ति, तर्हि भ्रष्टाचारः न्यूनो भवति, जनतायाः अधिकाराः संरक्ष्यन्ते तथा शासनं सुचारुरूपेण कार्यं करोति। प्रेसमाध्यमं समाजस्य दर्पणः इति कथ्यते। एषः समाजस्य वास्तविकस्थितिं जनसामान्यस्य सम्मुखे प्रस्तौति। स्वतन्त्रपत्रकारिता समाजे जागरूकतां वर्धयति। एषा अन्यायस्य विरोधं करोति, जनमतस्य निर्माणं करोति तथा सामाजिकसुधारकार्येषु योगदानं ददाति। यदि प्रेसमाध्यमं शासनस्य नियन्त्रणाधीनः भवति, तर्हि सत्यस्य प्रकाशनं बाधितं भवति। 2025 तमे वर्षे प्रकाशिते सूचकाङ्के नार्वेदेशः प्रथमस्थानं प्राप्तवान्। एस्टोनियादेशः द्वितीयं तथा नीदरलैण्डदेशः तृतीयं स्थानं प्राप्तवन्तौ। भारतदेशः 151 तमे स्थाने स्थितः आसीत्। अस्मिन् शीर्षस्थानानि प्राप्तवन्तः देशाः-नार्वे, एस्टोनिया ,नीदरलैण्ड,स्वीडन,डेनमार्क एते सन्ति। एतेषु राष्ट्रेषु पत्रकाराणां सुरक्षा, अभिव्यक्तिस्वतन्त्रता तथा शासनस्य न्यूनतमः हस्तक्षेपः दृश्यते। निम्नस्थानेषु वा अधःस्थितेषु राष्ट्रेषु चीनः, उत्तरकोरिया, सीरिया, एरिट्रिया इत्यादयः देशाः प्रमुखाः सन्ति। एतेषु राष्ट्रेषु पत्रकारितायाः स्थितिः अत्यन्तं दयनीया वर्तते।

भारतस्य स्थितिः अस्मिन् सन्दर्भे समीचीना नास्ति। भारतदेशः 2025 तमे वर्षे 180 राष्ट्रेषु 151 तमे स्थाने आसीत्। अपि च 2024 तमे वर्षे भारतस्य स्थानं 159 तमम् आसीत्, अतः अत्र सुधारः दृष्टः। तथापि भारतदेशः “अतिगम्भीरा(Very Serious)” इति श्रेण्यां स्थापितम् अस्ति । विविधप्रतिवेदनमनुसृत्य भारते पत्रकाराणां विरुद्धं हिंसात्मकघटनाः दृश्यन्ते।

अत्र मीडियास्वामित्वस्य केन्द्रीकरणं जातम्। मीडियाक्षेत्रे राजनीतिकप्रभावः दृश्यते। कतिपयेषु प्रदेशेषु पत्रकाराः भयस्य वातावरणे कार्यं कुर्वन्ति। भारतस्य लोकतान्त्रिकपरम्परा प्राचीना अस्ति, परन्तु पत्रकारितायाः स्वतन्त्रता विषये अद्यापि अनेकाः समस्याः सन्ति। विशेषतः सामाजिकमाध्यमेषु मिथ्यासूचनानां प्रसारः, राजनीतिकध्रुवीकरणं तथा पत्रकाराणां प्रति शत्रुताभावः एताः प्रमुखाःसमस्याः सन्ति। अस्मिन् सन्दर्भे यदि वयं नार्वेदेशं पश्यामःतर्हि नार्वेदेशः विश्वस्य सर्वाधिकं प्रेसमाध्यमस्वतन्त्रदेशः मन्यते। तत्र पत्रकाराः निर्भयतया कार्यं कुर्वन्ति। शासनं पत्रकारितायां न्यूनं हस्तक्षेपं करोति। पत्रकाराणां कृते सुरक्षाव्यवस्था क्रियते।देशे सूचना-अधिकारव्यवस्था उत्तमा अस्ति। पत्रकाराणां प्रति हिंसा अत्यल्पा भवति।

साम्प्रतं विश्वे प्रेसस्वतन्त्रतायाः स्थितिः चिन्ताजनका वर्तते। विविधदेशेषु पत्रकाराः कारागारे स्थाप्यन्ते, कतिपयेषु तेषां हत्या अपि क्रियते। युद्धक्षेत्रेषु पत्रकाराणां कार्यं अत्यन्तं कष्टकारकं भवति। RSF इति संगठनस्य प्रतिवेदनानुसारं विश्वस्य




अर्धाधिकजनसंख्या तेषु राष्ट्रेषु एव वसति यत्र प्रेसस्वतन्त्रतास्थितिः “गम्भीरा” अथवा “अत्यन्तगम्भीरा” अस्ति। राजनीतिकप्रभावः, आर्थिकनियन्त्रणम्, दुष्प्रचारः, सामाजिकमाध्यमानां दुरुपयोगः तथा राष्ट्रियसुरक्षाविधीनां दुरुपयोगः प्रेसस्वतन्त्रतायाः प्रमुखशत्रवः सन्ति। सामाजिकमाध्यमानि आधुनिकपत्रकारितायाः स्वरूपस्य परिवर्तनम् अकरोत्। अधुना समाचाराः शीघ्रतया जनसामान्यं प्रति गच्छन्ति। किन्तु अस्य दुष्परिणामाः अपि दृश्यन्ते। मिथ्यासमाचाराः, अप्रामाणिकसूचनाः तथा प्रचारात्मकसन्देशाः तीव्रतया प्रसारिताः भवन्ति।अतः आधुनिकपत्रकारितायां सत्यापनस्य महत्त्वं बहुवर्धितम् अभवत्। पत्रकारैःन केवलं शीघ्रता , अपितु सत्यता अपि रक्षणीया।

## पत्रकारितास्वतन्त्रतायाः बाधकानि तत्त्वानि

1. राजनीतिकहस्तक्षेपः-यदा शासनं पत्रकारितायां नियन्त्रणं कर्तुं प्रयतते, तदा प्रेसस्वतन्त्रता बाध्यते।
2. आर्थिकप्रभावः- विज्ञापनदातृणां तथा उद्योगसमूहानां प्रभावेन समाचाराणां निष्पक्षतायाः उपरि प्रश्नचिन्हः आगच्छति।
3. पत्रकाराणां सुरक्षा अनेकेषु देशेषु पत्रकाराः तर्जनैः(धमकी), हिंसायाः तथा कारावासस्य भयेन कार्यं कुर्वन्ति।
4. दुष्प्रचारः-सामाजिकमाध्यमेषु असत्यसूचनानां प्रसारः पत्रकारितायाः विश्वसनीयतायाःउपरि प्रश्नचिन्हः भवति।
5. विधिकदुरुपयोगः-राष्ट्रियसुरक्षाविधयः अथवा मानहानिविधयः कतिपयेषु राष्ट्रेषु पत्रकाराणां मौनं कर्तुं प्रयुज्यन्ते।

भारतस्य पत्रकारितास्वतन्त्रतास्थितेः उन्नयनार्थं निम्नलिखिताः उपायाः आवश्यकाः सन्ति—

## पत्रकाराणां सुरक्षायै कठोरविधीनां व्यवस्था।

पत्रकारिता (मीडिया)स्वामित्वस्य क्षेत्रे पारदर्शिता अनिवार्या भवेत्।पत्रकारिताक्षेत्रे शासनस्य न्यूनतमः हस्तक्षेपः भवेत् । शासनेन मिथ्यासमाचारनियन्त्रणाय प्रभावीव्यवस्था कर्तव्या। पत्रकारिताशिक्षायाः सुदृढीकरणम् आवश्यकं वर्तते। अभिव्यक्तिस्वतन्त्रता इति संवैधानिकस्य अधिकारस्य अनिवार्यतया पालनम् आवश्यकम् अस्ति। यतो हि अभिव्यक्तेः स्वतन्त्रतायाः अधिकारः संविधानप्रदत्तः अस्ति।

यद्यपि प्रेस इत्यस्य स्वतन्त्रता आवश्यकी, तथापि अत्र पत्रकाराणाम् उत्तरदायित्वमपि महत्त्वपूर्णं भवति । पत्रकारितायाः उद्देश्यं न केवलं लोमहर्षणं(सनसनीखेज) न, अपितु सत्यस्य निष्पक्षप्रस्तुतीकरणं भवेत्। पत्रकारैः राष्ट्रहितं, सामाजिकसमरसता तथा नैतिकमूल्यानि संरक्षितानि भवितव्यानि। स्वतन्त्रता यदि उत्तरदायित्वविहीना भवति, तर्हि सा अराजकतां जनयति। अतः पत्रकारितायां सत्यता, निष्पक्षता, नैतिकता च अनिवार्याः सन्ति।

विश्वप्रेसस्वतन्त्रतासूचकाङ्कः केवलं सङ्ख्यानां सूची नास्ति, अपितु लोकतन्त्रस्य स्वास्थ्यस्य दर्पणः अस्ति। यत्र प्रेस इति स्वतन्त्रः भवति, तत्र जनतन्त्रं सुदृढं भवति। पत्रकारिता समाजस्य चेतना अस्ति। यदि एषा चेतना बाध्यते, तर्हि समाजस्य विकासः अपि अवरुद्धो भवति। भारतस्य कृते अपि एषः सूचकाङ्कः आत्ममन्थनस्य अवसरः अस्ति। विश्वस्य महालोकतन्त्ररूपेण भारतदेशेन अपि पत्रकारितायाः स्वतन्त्रतां, पत्रकाराणां सुरक्षां तथा अभिव्यक्तिस्वतन्त्रतां च सुदृढीकर्तुं सततं प्रयत्नः करणीयः। अन्ते च स्मर्तव्यं यत्— “स्वतन्त्रः प्रेस"इत्येव लोकतन्त्रस्य प्राणः अस्ति।” यदा पत्रकाराः निर्भयतया सत्यं वदन्ति, तदा एव राष्ट्रम् प्रगतिमार्गे द्रुतगत्या अग्रे गन्तुं शक्नोति। सर्वैः देशैः सर्वकारैः वा लोकतंत्रस्य चतुर्थस्तम्भस्य पत्रकारितायाः रक्षा करणीया।

## "इषुकारन्यायः"

बाणानां निर्माणं यः करोति सः स्वकर्मणि एतावान् व्यग्रः भवति यत् परितः किं चलति इति भानं तस्य न भवति। एतादृशी श्रेष्ठा एकाग्रता या भवति तस्याः वर्णनम् अनेन न्यायेन भवति।

**डा. वर्षा प्रकाश टोणगांवकर, पुणे/ महाराष्ट्रम्**

## वार्ता-संवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

प्रथमा वार्ता वर्तते- एकया संस्थया एकस्याः उद्योग-प्रार्थिन्याः निराकरणाय एव जाल- दृश्य-गोष्ठी आयोजिता। तेन सा अपमानिता जाता।

**काव्या-** नमो नमः नन्दिनि। संस्थया अशिष्टं वर्तनं कृतम्, येन तस्याः मनसि पीडा जाता। द्वितीया वार्ता वर्तते- एकेन तन्त्रज्ञेन कार्यालयस्य कठोर-नियमानां कारणात् द्विसप्तति-लक्षरूप्यकाणां वृत्तिः निराकृता। सः गृहात् कार्यम् एव कर्तुं निश्चितवान् अस्ति।

**नन्दिनी-** सत्यम्, अद्यत्वे केवलं धनं न इष्टम्, आत्मगौरवं सुखं च मुख्ये वर्तेते। तेन उचितः निर्णयः कृतः। तृतीया वार्ता अस्ति- शेरवुड-वने रौबिन हुड नामकस्य लोकवीरस्य आश्रयभूतः द्वादशशतवर्षीयः महा-बलूतवृक्षः नष्टः जातः।

**काव्या-** अहो, एषा तु पर्यावरणस्य इतिहासस्य च महती हानिः। तस्य विनाशात् सर्वेषां मनसि दुःखं जातम्। चतुर्थी वार्ता वर्तते- गूगलाख्य- गवेषण- यन्त्रस्य कृत्रिम- बुद्ध्या एस. सी. पी. नामक- भीषण- काल्पनिक-कथानां पात्राणि सत्यानि इति मत्वा प्रदर्शितानि।

**नन्दिनी-** अहो आश्चर्यम्! यन्त्रस्य कृत्रिममेधा अपि भ्रमिता जाता! सत्यासत्ययोः विवेकः यन्त्रेषु नास्ति इति अनेन सिद्धम्। अद्यतनः कार्यक्रमः समाप्तः। पुनर्मेलिष्यामः। धन्यवादः।

